# द्वादशः पाठः

# सोमशर्मपितुः कथा

एकस्मिन् ग्रामे कश्चित् निर्धनः युवकः आसीत्। तस्य नाम धनपालः आसीत्। सः प्रतिदिनं भिक्षायै ग्रामं ग्रामं प्रति भ्रमति स्म। भिक्षायां प्राप्तैः सक्तुभिः तस्य घटः पूर्णः अभवत्। सः घटं नागदन्ते अवलम्ब्य तस्य नीचैः खट्वायां शयनं करोति स्म, शयनकाले च निरन्तरम् एकदृष्ट्या घटं पश्यति स्म।



सः एकदा रात्रौ एवम् अचिन्तयत्– मम अयं घटः सक्तुभिः पूर्णः अस्ति। यदा दुर्भिक्षं भविष्यति तदा सक्तु-विक्रयेण प्रचुरं धनं प्राप्स्यामि। ततः तेन धनेन अहम् अजाद्वयस्य क्रयं करिष्यामि। अजाद्वयस्य शिशुभिः अजानां समूहः मम समीपे भविष्यति। अजानां विक्रयेण गवां, महिषीणाम्, अश्वानां च क्रयं करिष्यामि, तासां शिशुभिः बहवः पशवः भविष्यन्ति। तेषां विक्रयेण मम पार्श्वे बहूनि धनानि आगमिष्यन्ति, धनेन विशालस्य भवनस्य निर्माणं कारयिष्यामि। तदा मां धनिकं मत्वा कोऽपि रूपवतीं कन्यां मह्यं प्रदास्यति। ततः मम पुत्रः भविष्यति। तस्य नाम सोमशर्मा इति करिष्यामि। कदाचित् क्रीडन् सः पुत्रः मम समीपम् आगमिष्यति। तदा कुपितः अहं स्वपत्नीं वदिष्यामि– "गृहाण एनं बालकम्।" सा गृहकार्ये संलग्ना मम वचनं यदा न श्रोष्यति तदा अहं पत्न्याः उपरि पादेन प्रहरिष्यामि।

एवं स्वप्नेन प्रेरितः सः पादप्रहारम् अकरोत्। तेन सक्तुपूरितः घटः भूमौ पतितः भग्नः च अभवत्। भग्नेन घटेन सह एव तस्य मनोरथाः अपि भग्नाः अभवन्। अतः उक्तम्–



**उद्यमेन हि सिध्यन्ति**
**कार्याणि न मनोरथैः** इति।

## शब्दार्थाः



| | | |
|---|---|---|
| **सक्तुभिः** | – | (बहुत) सत्तु से |
| **नागदन्ते** | – | खूँटी पर |
| **अवलम्ब्य** | – | टाँगकर |
| **खट्वायाम्** | – | खाट पर |
| **एकदृष्ट्या** | – | एकटक |
| **दुर्भिक्षम्** | – | अकाल |
| **प्रचुरम्** | – | ढेर सारा |
| **प्राप्स्यामि** | – | प्राप्त करूँगा/प्राप्त करूँगी |
| **अजाद्वयस्य** | – | दो बकरियों का |
| **क्रयः** | – | खरीद |
| **शिशुभिः** | – | बच्चों से |
| **विक्रयेण** | – | बेचने से |
| **गवाम्** | – | गायों का/के/की |

**महिषीणाम्** – भैंसों का/के/की
**अश्वानाम्** – घोड़ों का/के/की
**पार्श्वे** – पास में
**मत्वा** – मानकर
**मह्यम्** – मुझे
**प्रदास्यति** – देगा/देगी
**गृहाण** – ग्रहण करो
**कदाचित्** – कभी
**क्रीडन्** – खेलता हुआ
**कुपितः** – क्रोधित
**संलग्ना** – लगी हुई
**श्रोष्यति** – सुनेगी/सुनेगा
**उपरि** (अव्यय) – ऊपर
**भग्नः** – टूट गया
**कारयिष्यामि** – कराऊँगा/कराऊँगी

## अभ्यासः



1. **कर्तृपदैः रिक्तस्थानानि पूरयत–**

**यथा– बालकौ** कन्दुकं क्रीडतः।

(क) ............... पादप्रहारं करोति।

(ख) ............... क्रन्दुकेन क्रीडामः।

(ग) ............... सत्यं वदिष्यामि।

(घ) ............... तत्र किं किं करोषि?

(ङ) ................ कदा गृहम् आगमिष्यथ?

(च) ................ भोजनं पचन्ति।

## 2. अधोलिखितानां शब्दानां विलोमपदानि पाठम् आधृत्य लिखत-

**यथा-** दूरे - समीपे

क्रयेण - ................

उच्चैः - ................

दिने - ................

अपूर्णः - ................

आकाशे - ................

तदा - ................

धनिकः - ................

## 3. निर्देशानुसारं लकारपरिवर्तनं कुरुत-

**यथा-** प्रणवः उद्याने **भ्रमति**। (लृट्लकारे) प्रणवः उद्याने **भ्रमिष्यति।**

(क) सः लेखं लिखति। (लृट्लकारे) ................................................

(ख) अहं कथां चिन्तयिष्यामि। (लट्लकारे) ................................................

(ग) ते गृहे तिष्ठन्ति। (लृट्लकारे) ................................................

(घ) वृक्षात् पत्राणि पतन्ति। (लृट्लकारे) ................................................

(ङ) त्वं चित्रं द्रक्ष्यसि। (लट्लकारे) ................................................

(च) वयं दुग्धं पास्यामः। (लट्लकारे) ................................................

(छ) तत्र किम् अस्ति। (लृट्लकारे) ................................................

**4. लिङ्गपरिवर्तनं कुरुत–**

| | | |
|---|---|---|
| **यथा–** | अश्वः | **अश्वा** |
| | अजः | .............. |
| | .............. | बालिका |
| | .............. | छात्रा |
| | मूषकः | .............. |
| | .............. | चटका |
| | लेखकः | .............. |
| | नायकः | .............. |

**5. प्रश्नानाम् उत्तराणि लिखत–**

(क) युवकः कीदृशः आसीत्?
(ख) युवकः घटं कुत्र अवलम्ब्य शयनं करोति स्म?
(ग) घटः कुत्र पतितः?
(घ) कार्याणि केन सिध्यन्ति?
(ङ) स्वप्नेन प्रेरितः युवकः किम् अकरोत्?

**6. अधोलिखितानि वाक्यानि घटनाक्रमानुसारं लिखत–**

(क) युवकः धनपालः प्रतिदिनं ग्रामं ग्रामं भ्रमति स्म।
(ख) कार्याणि उद्यमेन सिध्यन्ति।
(ग) एकस्मिन् ग्रामे एकः युवकः आसीत्।
(घ) सः अचिन्तयत्– मां धनिकं मत्वा कोऽपि रूपवतीं कन्यां मह्यं प्रदास्यति।
(ङ) सक्तुपूरितः घटः भूमौ पतितः।
(च) स्वप्नेन प्रेरितः सः पादप्रहारम् अकरोत्।